त्र्यहैहिकः, त्रि, (ईहायां चेष्टायां भवमैहिकं धनम् । "तत्र भवः ।" ४ । ३ । ५३ । इति ठञ् । त्र्यहे दिनत्रये पर्य्याप्तं ऐहिकं धनं यस्य ।) दिनत्रयनिर्व्वाहोचितधनयुक्तः । यथा,

"कुशूलधान्यको वा स्यात् कुम्भीधान्यक एव वा ।
त्र्यहैहिको वापि भवेदश्वस्तनिक एव वा ॥"

इति मानवे । ४ । ७ ॥

"कुशूलधान्यक इति । कुशूलो ब्रीह्यागारं स्यादित्यभिधानिकाः । इष्टकादिनिर्म्मितागारधान्यसञ्चयो भवेत् । अत्र कालविशेषापेक्षायाम् ।
यस्य त्रैवार्षिकं भक्तं पर्य्याप्तं भृत्यवृत्तये ।
अधिकं वापि विद्येत स सोमं पातुमर्हति ॥
इति मनूक्त एव कालो ग्राह्यः । तेन नित्यनैमित्तिकधर्म्मक्षत्यपोष्यवर्गसहितस्य गृहिणो यावता धान्यादिधनेन वर्षत्रयं समधिकं वा निर्व्वाहो भवति तावद्धनः कुशूलधान्यक उच्यते । वर्षनिर्व्वाहोचितधान्यादिधनः कुम्भीधान्यः । प्राक् सौमिकीः क्रियाः कुर्य्यात् यस्यान्नं वार्षिकं भवेदिति याज्ञवल्क्येन गृहस्थस्य वार्षिकसञ्चयाभ्यनुज्ञानात् । मनुरपि यदा वानप्रस्थस्यैव समानिचय एव वेत्यनेन समासञ्चयं वक्ष्यति तदपेक्षया बहुपोष्यवर्गस्य गृहिणः समुचितः संवत्सरसञ्चयः । मेधातिथिस्तु । यावता धान्यादिधनेन बहुभृत्यदारादिमतस्त्रिसंवत्सरस्थितिर्भवति तावत् सुवर्णादिधनवानपि कुशूलधान्यक इत्यभिधाय कुम्भी उष्ट्रिका यावन्मात्रिकधान्यादिनिचयः कुम्भीधान्यक इति व्याख्यातवान् । गोविन्दराजस्तु कुशूलधान्यक इत्येतद्व्याचष्ट कोष्ठप्रमाणधान्यसञ्चयो वा स्यात् द्वादशाहमात्रपर्य्याप्तधनः । कुम्भीधान्यक इत्येतद्व्याचष्टे उष्ट्रिकाप्रमाणधान्यादिसञ्चयो वा षडहमात्रपर्य्याप्तधनः ।
द्वादशाहं कुशूलेन वृत्तिः कुम्भ्या दिनानि षट् ।
इमाममूलां गोविन्दराजोक्तिं नानुरुन्धहे ।
ईहा चेष्टा तस्यां भवं ऐहिकं त्र्यहपर्य्याप्तमैहिकं धनं यस्य स त्र्यहैहिकः तथा वा स्यात् दिनत्रयनिर्व्वाहोचितधन इत्यर्थः । श्वोभवं श्वस्तनं भक्तं तदस्यास्तीति मत्वर्थीयमिकं कृत्वा नञ् समासः तथा वा भवेत् ।" इति कुल्लूकभट्टः ॥

त्र्यार्षेयाः, पुं, (ऋषेरयं आर्षेयः । ऋषि+ढक् । त्रय आर्षेयाः ऋषिधर्म्मा नेत्रादीन्द्रियक्रियाभावरूपा येषाम् ।) अन्धवधिरमूकाः । यथा । "अत्रोक्तानि वचनानि सर्व्वाणि तिर्य्यगधिकरणन्यायमूलानि । तथा हि तिर्य्यगधिकरणे । तिर्य्यक्पङ्गुत्र्यार्षेयदेवतानामनधिकार इति यागमात्रे उक्तम् । तत्र हेतवः तिरश्चां विशिष्टान्तःकरणविरहात् पङ्गोः प्रचरणविरहात् त्र्यार्षेयाणामन्धवधिरमूकानां अवेक्षणश्रवणोच्चारणविरहादिति श्रीचन्द्रशेखरवाचस्पतिकृतचन्दनधेनु-विधिघृततिर्य्यगधिकरणम् ॥ (त्रय आर्षेया ऋषयो यत्र । त्रिप्रवरो गोत्रभेदः ॥)

त्र्याहिकः, त्रि, (त्र्यहे भवः । त्र्यह+ठञ् ।) तृतीयेऽह्नि भवः । यथा, ऐकाहिकद्व्याहिकत्र्याहिकचातुर्थिकसततज्वरविषमज्वर इत्याद्यपराजितास्तोत्रम् ॥

("ऐकाहिको द्व्याहिकश्च त्र्याहिकश्च तथापरः ।
वेलाज्वरश्चतुर्थोऽपि विज्ञानीयाद्विचक्षणः ॥"
इति हारीते चिकित्सितस्थाने द्वितीयेऽध्याये ॥
अस्यौषधं यथा,—
"रसेन गन्धं प्रकृष्य शिखिग्रीवञ्च पादिकम् ।
गोजिह्वया जयन्त्या च तण्डुलीयेन भावयेत् ॥
प्रत्येकं सप्तसप्ताथ शुष्कं गुञ्जाचतुष्टयम् ।
जरणेन घृतेनाद्यात् त्र्याहिकज्वरशान्तये ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे ॥)

त्र्यूषणं, क्ली, (त्रयाणां ऊषणानां समाहारः । पात्रादित्वात् स्त्रीत्वं न ।) मिलितशुण्ठीपिप्पलीमरिचम् । इत्यमरः । २ । १० । १११ । (यथा, गारुडे १९८ अध्याये ।
"यमानी चित्रकं धान्यं त्र्यूषणं जीरकं तथा ॥")

त्र्यूषणं, क्ली, (त्रयाणां ऊषणानां पिप्पलीमरिचशुण्ठीनां समाहारः ।) त्र्यूषणम् । इत्यमरटीकायां भरतः ॥
("पिप्पलीमरिचं शुण्ठीत्रयमेतद्विमिश्रितम् ।
त्रिकटु त्र्यूषणं योषं कटुत्रयमथोच्यते ॥"
इति वैद्यकपरिभाषायाम् ॥
अस्य गुणा यथा,—
"त्र्यूषणं दीपनं हन्ति श्वासकासत्वगामयान् ।
गुल्ममेहकफस्थौल्यमेदश्लीपदपीनसान् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
(घृतविशेषः । यथा, चरके चिकित्सास्थाने २२ अध्याये ।
"त्र्यूषणां त्रिफलां द्राक्षां काश्मर्य्याणि परूषकम् ।
द्वे पाठे सरलं यार्थ्वी स्वगुप्तां चित्रकं शटीम् ॥
ब्राह्मीं तामलकीं मेदां काकनासां शतावरीम् ।
त्रिकण्टकां विदारीञ्च पिष्ट्वा कर्षसमं घृतात् ॥
प्रस्थं चतुर्गुणं क्षीरं सिद्धं कासहरं पिबेत् ।
ज्वरगुल्मारुचिप्लीहशिरोहृत्पार्श्वशूलनुत् ॥
कामलार्शोऽनिलाष्ठीलाक्षतशोषक्षयापहम् ।
त्र्यूषणं नाम विख्यातमेतद्घृतमनुत्तमम् ॥")

त्वं, त्रि, (युष्मद्+सु । "त्वाहौ सौ ।" ७ । २ । ९४ । इति त्वादेशः ।) भवान् । तुमि इति भाषा । युष्मच्छब्दस्य प्रथमैकवचनान्तरूपोऽयं लिङ्गत्रये समानः । इति व्याकरणम् ॥

त्वः, त्रि, (तनोति विस्तारयतीति । तन+"तनोतेरनश्च वः ।" उणां । २ । ६३ । इति चात् क्विप् अनश्च वः । आगमानित्यत्वात् तुगभावः ।) भिन्नः । अन्यः । इत्यमरः । ३ । १ । ८२ ॥ (एकः । इति निरुक्तिः । १ । ७ ॥ यथा, ऋग्वेदे । १० । ७१ । ४ ।
"उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् ।
उतो त्वस्मै तन्वं वि सस्रे जायेव पत्य उशती सुवासाः ॥"
"त्वशब्द एकवाची । एकः । उतशब्दोऽप्यर्थे । पश्यन्नपि मनसा पर्य्यालोचयन्नपि वाचं न ददर्श । दर्शनफलाभावान्न पश्यति । त्व एकः शृण्वन्नप्येनां वाचं न शृणोति अवणफलाभावात् । इत्यनेनार्द्धेनाविद्वानभिहितः ॥" इति तद्भाष्ये सायनः ॥)

त्वक्, [च्] स्त्री, (त्वचति संवृणोति मेदशोणितादिकमिति । त्वच संवरणे+क्विप् । यद्वा, तनोति विस्तारयतीति । तन+"तनोतेरनश्च वः ।" उणां । २ । ६३ । इति चिक् अनश्च वः ।) इन्द्रियविशेषः । यथा,—
"पूर्व्ववन्नित्यतायुक्तं देहव्यापि त्वगिन्द्रियम् ।
प्राणादिस्तु महावायुपर्य्यन्तो विषयो मतः ॥"
उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः ।
रूपान्यच्चक्षुषो योग्यं रूपमत्रापि कारणम् ॥
द्रव्याध्यक्षे त्वचो योगो मनसा ज्ञानकारणम् ॥"
इति भाषापरिच्छेदः ॥
वल्कलम् । (यथा, रघुः । २ । ३७ ।
"कण्डूयमानेन कटं कदाचित्
वन्यद्विपेनोन्मथिता त्वगस्य ॥")
गुड़त्वक् । (यथा, वृहत्संहितायाम् । ७७।१२।
"त्वग्शीरपत्रभागैः सूक्ष्मैलार्द्धेन संयुतैश्चूर्णः ।
पटवासः प्रवरोऽयं मृगकर्पूरप्रबोधेन ॥")
चर्म्म । इति मेदिनी । चे, ६ ॥ अस्य पर्य्यायः । असृग्धरा २ । इत्यमरः ॥ अस्रधरा ३ । इति तट्टीका ॥ त्वचम् ४ त्वचा ५ चर्म्म ६ कृत्ती ७ कृत्ती ८ । इति शब्दरत्नावली ॥ (यथा, रघुः । ३ । ३१ ।
"त्वचं स मेध्यां परिधाय रौरवी
मशिक्षितास्त्रं पितुरेव मन्त्रवत् ।
न केवलं तद्गुरुरेकपार्थिवः
क्षितावभूदेकधनुर्द्धरोऽपि सः ॥"
कञ्चुकः । यथा, मनुः । २ । ७९ ।
"महतोऽप्येनसो मासात् त्वचेवाहिर्विमुच्यते ॥")
त्वचम् । इति राजनिर्घण्टः ॥ दारचिनी इति भाषा ॥

त्वक्कण्डुरः, पुं, (कण्डुं रातीति । रा+कः । त्वचः कण्डुरः ।) व्रणः । इति हारावली । १५६ ॥

त्वक्क्षीरा, स्त्री, (वंशत्वचः क्षीरमस्यत्र ।) वंशरोचना । इत्यमरः । २ । ९ । १०९ ॥
(वंशरोचनाशब्दे विवृतिरस्या ज्ञातव्या ॥)

त्वक्क्षीरी, स्त्री, (वंशत्वचः क्षीरमत्र । गौरादित्वात् ङीष् ।) त्वक्क्षीरा । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते । १ । ४४ ।
"सितानगन्धा त्वक्क्षीरी विदारी त्रिवृतः समाः ॥"
(पर्य्यायोऽस्या यथा,—
"स्याद्वंशरोचना वांशी तुगाक्षीरी तुगा शुभा ।
त्वक्क्षीरी वंशजा शुभ्रा वंशक्षीरी च वैणवी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

त्वक्छदः, पुं, (त्वगेव छदो यस्य ।) क्षीरीशस्त्रः । इति रत्नमाला ॥ क्षीरकञ्चुकी इति भाषा ॥